IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# उपनिषत्सिद्धान्ताः - एकं समीक्षात्मकम् अध्ययनम्

**ड. प्रदीप कुमार नायक (शिक्षकप्रशिक्षक)**

**AT-DIET,BHADRAK,AGARPADA, PO-B.T PUR,DIST-BHADRAK,756115**

**शोधसारः**

**अध्यात्मविद्याप्रधाना वेदान्तसंज्ञका शान्तिप्रदायिनी मानवसंस्कृतेः जननी स्वरूपिणी ज्ञान-गंगोत्रीरूपा आवहमानेयमुपनिषत् खलु अस्मिन् विश्ववक्षसि । सततं प्रवाहिता उपनिषद्गंगा धारयित्वा विश्वतत्त्वज्ञानस्य महिमानम् । ब्रह्मविद्येयं वाङ्ङ्लानां चिकित्सिका मनसः आत्मनश्च नितरां शान्तिप्रदा । उपनिषत्सु अध्यात्मविद्याबिषयकानि बहूनि तत्त्वानि वर्ण्णितानि विद्यन्ते । सांख्य-योग-वेदान्त-वैष्णव-शैव-शाक्तप्रभृतीनां सिद्धान्तानां सामूहिकतारूपेण उपनिषदां सृष्टिः। अध्यात्मज्ञानमेव जीवनस्य परमं ध्येयम् । जीवनस्य पूर्णतायै उपनिषदः संस्कृतवाङ्ङ्ये सातिशयत्वं तन्वन्ति । मानवजीवनदर्शनस्य परमतत्त्वमाबहन्ती श्रीमद्भगवद्गीता उपनिषदां सारः एव प्रामाणिकतथ्यमस्ति । तद्यथा वर्ण्णितं गीतामाहात्म्ये-"सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः इति ।" उपनिषत्सु न केवलमध्यात्मज्ञानमपितु जगत्स्वरूपमुपदेशामृतं विश्वसांस्कृतिकपरंपरा मानवजीवनतत्त्वं महत्त्वञ्च दरीदृश्यन्ते । उपनिषदः नामान्तरं वेदान्तशास्त्रमिति । सर्वैः वेदैः सह उपनिषदां सम्बन्धः अबिच्छिन्नः ।**

**कूटशब्दाः उपनिषदः, ब्रह्मविद्या, मानवसंस्कृतेः, वाङ्ङ्लानाम् , वेदान्तशास्त्रम्**

# उपक्रमणिका :

**'उप' उपसर्गात् 'नि' उपसर्गात् विशरण गत्यवसादानार्थकस्य 'षदलृ' धातोः क्विप् प्रत्ययात् च उप-नि+ षदलृ+ क्विप् इतिरूपेण 'उपनिषद्' शब्दः निष्पद्यते । शब्दोऽयं ब्रह्मविद्यापरा उपदेशसमुच्चयः उपनिषद् आध्यात्मिक-आधिदैविक-आधिभौतिक नामध्येयानां त्रिविधदुःखानाम् अपहारिणी मोक्षमूला एव । गुरोः समीपमुपविश्य या विद्या अधीयते सा उपनिषदिति । या विद्या सर्वान्नर्थान् अज्ञानात्मिकाः क्रियाः विनाशयति सा एव उपनिषदिति व्युत्पत्तिनिष्पन्नः अर्थः । सर्वान् अनर्थकरं विनश्य मायासंसारकारणभूतमाज्ञया मानवं ब्रह्मणः समीपं या नेतुं शक्नोति सा एव उपनिषदिति । इयमेव आत्मिकी विद्या ब्रह्मविद्या वा भारतीयदर्शनानामतीव प्रामाणिकत्वं भजते । वेदादीनामध्ययनात् अनन्तरम् उपनिषदादीनाम् अध्ययनं क्रियते । विशृङ्खलितं नीतिभ्रष्टं मानवजीवनं कर्त्तव्यकर्मणि प्रेरयितुं प्रयासोऽयं शोधकर्त्तुः । यथार्थतया वक्तुं शक्यते उपनिषद् गौरिति१ । उपनिषदां वैशिष्ट्यम् अभिलक्ष्य पाश्चात्यदार्शनिकेन सोपेनहोरमहोदयेन उक्तम् - "In the whole world there is study so benificial and so elevating as that of Upanishads, It has been the solace of my life, It will be the solace of death."**

**रहस्यविद्यात्मिकासु उपनिषत्सु परमात्मनः स्वरूपम् आध्यात्मिकविद्यायाः वा न केवलमालोचनं दृश्यते अपितु विविधाः दार्शनिकसिद्धान्ताः सूक्ष्मदृष्ट्या बृंहिताः । संसारोपकारहेतवः सांख्य-योग-वेदान्त-वैष्णव-शैव-शाक्ताद्वैतदर्शनसिद्धान्ताः उपनिषदां कलेवरं पुष्णान्ति । ब्रह्मजिज्ञासूनां कृते रहस्यमयी विद्येयं संस्कृतवाङ्मयाकाशे शीतलांशुचांद्रमसि इव पावयति रञ्जयति च तनमनसी । एतासां महत्त्वमनिर्वचनीयं कैश्चिच्छब्दैः । आदौ शोधकर्त्तृणा उपनिषदां कालः भेदाः महत्त्वञ्च आलोच्यन्ते संशयविलोपनार्थम् ।**

**पादटीका :**

**१°सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः (श्रीमद्भगवद्गीतामाहात्म्यम्)**

**उपनिषदां कालः**

**वैदिकशास्त्राणि इव उपनिषदां रचनाकालनिर्द्धारणे सदा अनिश्चितता दृश्यते । यथा अपौरुषेयः वेदः तादृशी उपनिषदपि,वेदाः नैकेन ऋषिणा संरचिताः । बृहदारण्यक-छान्दोंग्य-कौशितकी-ऐतरेय-तैत्तिरीयाः पंचोपनिषदः भगवतः बुद्धस्य पूर्वकालिकाः । संस्कृतसाहित्येतिहासदृष्ट्या ख्री.पू. ३००० तः ख्री.पू.६०० इति वैदिकयुगस्य कालः इति मन्यते । एभिः २५०० बर्षैः वेद-ब्राह्मण-आरण्यक-उपनिषदां च रचना स्यादिति ऐतिहासिकाः विवदन्ते । तत्रापि एतदुक्तं यत् 'आल्लोपनिषद्' प्रभृतीनाम् अर्वाचीनोपनिषदां रचना वैदिककालादनन्तरमिति ।**

**उपनिषद्भेदाः परिचयश्च :-**

**निखिलेऽस्मिन् विशाले उपनिषद्साहित्ये भेदविषयकं तथ्यं यद्यपि निर्णतुमशक्यं तथापि इदं वक्तुं शक्यते उपनिषदः सम्बन्धः वैदिकसंहितया ब्राह्मणेन आरण्यकेन सह च वर्त्तते । एतत् सर्वं विचार्य उपनिषदां प्रकाराः आलोचयितव्याः । उपनिषदां संख्या अद्यापि न निर्धारिता । केचित् एतासां द्विशतं केचिच्च अष्टोत्तरशतमित्याहुः । यद्वा भवतु नाम सर्वा उपनिषदः बिषयानुसारं षट्सु भागेषु विभक्ताः । तासु सप्तदश सांख्यसिद्धान्तयुक्ताः विंशतिः योगसिद्धान्तयुक्ताः चतुर्विंशतिः वेदांतसिद्धांतान्विताः चतुर्द्दशः वैष्णवसिद्धांतमाश्रित्य पंचदशपरिमिताः शैवसिद्धांताश्रिताः अष्टादशश्च शाक्तसिद्धांतमाश्रित्य अन्यसिद्धांतैश्च परिपूर्णाः दृश्यन्ते । तत्र एकादशोपनिषदः**

**प्रामाणिकत्वं भजन्ते । ईश-केन-कठ-प्रश्न-माण्डूक्य-मुण्डक-ऐतरेय-तैत्तिरीय-छान्दोग्य-बृहदारण्यक-श्वेताश्वतराः इति क्रमेण । ऋग्वेदेन सह ऐतरेय-कौषितक्योः ईश-बृहदारण्यकयोःशुक्लयजुर्वेदेन सह कठ-तैत्तिरीययोः कृष्णयजुर्वेदेन सह सामवेदेन सह छान्दोग्य-केनोपनिषदोः अथर्वेण सह च मुण्डक-प्रश्न-मांडूक्योपनिषदां सम्बन्धः परिलक्ष्यते ।**

**निखिलज्ञानराशिविमंडिता अज्ञान-कल्मषविध्वंसिनी उपनिषत् खलु वेदान्तस्वरूपिणी इत्यस्माभिरेव पूर्वमुक्तम् । अग्रे**

**कैश्चित् बिन्दुभिः महत्त्वमत्र प्रस्तौति शोधकारः ।**

**उपनिषत्सु जगतस्वरूपम् :**

**सर्वं खलु इदं जगत् ब्रह्मणः रूपान्तरम् अनन्तज्ञानमय सच्चिदानन्दपरमात्मनः चेष्टाविशेषम् । अस्मिन् जगति यत् किंचित् परिलक्ष्यते तदेव परमात्मनः विपरिणामम् । परमात्मा चेतना पदार्थेषु आत्मरूपः अचेतनेषु अणुरूपश्च । अस्यां पृथिव्यां सर्वाणि वस्तूनि ईश्वरस्य त्यागः । ईशोपनिषदि गीयते-**

**'ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्'३ ।**

**संसारोऽयं बृक्षश्चेत्तर्हि तन्मूलमेव ब्रह्म । कठोपनिषदि द्वितीयाध्याये सनातनरूपः अश्वत्थबृक्षः इति वर्ण्णितः । तत्र व्याख्या जाता –**

**"ऊर्द्ध्वमूलोवाक्शाख एषोऽश्वत्थ सनातनः**

**तदेवशुक्रं तद्ब्रह्म तदेवामृतमुच्यते ।**

**तस्मिंल्लोकाः श्रिताः सर्वे .............।" ४**

**तत्र आकाशसमः परमात्मा जीवात्मारूपेण संसारेऽस्मिन् लीलां जनयति । महाकाशतः प्रपञ्च इव इदमवध्येयम् । परंब्रह्म परमात्मा ऊर्णनाभिः इव वर्णितः उपनिषदि । अन्तःकरणात् यथा बहिरानीय ऊर्णनाभिः जालं सृजति तथैव अन्तःप्रदेशात् विविधानि उपादानानि परमात्मा बहिःप्रदेशं संसारत्वेन सृजति । यथा माता धरित्री विना पक्षपातं बिभिन्नानि बीजानि बृक्षरूपेण परिवर्त्तयति तथैव परमात्मा विविधयोनिभिः जीवान् सृजति । उक्तम्-**

**"यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति ।**

**यथा सतः पुरुषात्केशलोमानि तथा क्षरात्संभवति ।।"५**

**अपि च-**

**"तपसा चीयते ब्रह्म ततोऽन्नमभिजायते ।**

**अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम् ।।"६**

**एतस्मात् ज्ञायते यत् आदौ परमात्मनः प्रजापतिः ब्रह्मा ब्रह्मणः प्राणिनः अन्नञ्च जायन्ते । पुनः अन्नात् प्राणाः मनः पञ्चमहाभूतानि कर्मादीनि कर्मफलानि च प्रजायन्ते ।**

---

**पादटीका :**

**३.ईशोप°१ ४.कठोप°२/३/१ ५.मुंडको°१/१/७ ६. मुंडको°१/१/८**

**आध्यात्मिकज्ञानप्रदायिनी उपनिषत् :**

**आध्यात्मिकज्ञानं नाम आत्मासम्बन्धी इति । कोऽसौ आत्मा किमस्य च रहस्यम् आत्मा-परमात्मनोः कः सम्बन्धः इत्याकारकं ज्ञानमाश्रित्य उपनिषदः जयगानमपेक्षते । तत्र मुण्डोकोपनिषदि आत्मा अव्यक्तः अचिन्त्यः न च मेधया न वा बहुना श्रुतेन लभ्यः इति प्रतिपादितः । अयमात्मा कर्त्तव्यरहितपुरुषेणाप्राप्यः ब्रह्मणः उपासनात् विनाऽपि अवोध्यः । निरन्तरः परमेश्वरोपासकः परमात्मनः स्वरूपे प्रबिष्टुमर्हति । एतद्धि उपनिषदि –**

**"नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाप्यलिङ्गात् ,**

**एतैरूपायैर्यतते यस्तु विद्वांस्तस्तैष आत्मा विशते ब्रह्मधाम ।"७**

**परमात्मा नित्यः अविनाशी असीमश्च । परमात्मनः गूढ़रहस्यं सर्वेषां सांसारिकजनानां कृते ज्ञातव्यम् । जीवात्मनोः श्रेष्ठोऽयं सर्वथा सत्यम् । अस्य ज्ञाता सांसारिक-कर्मबन्धनात् अतिक्रम्य मोक्षं प्राप्नोति । कठोपनिषदि गीयते-**

**"अशव्दमस्पर्शमरूपमव्ययं तथा रसं नित्यमगन्धवच्च यत् ,**

**अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते ।"८**

विद्यास्वरूपा आध्यात्मिकता एव यथार्थज्ञानम् । एनां परित्यज्य न कस्यचित् स्थितिः कल्पयितुं शक्यते । परमात्मनैव परमात्मनः शक्तिः ज्ञायते । विद्ययैव अमृतस्वरूपं परंब्रह्मज्ञानमर्जयितुं शक्यते । गुरु-शिष्यसम्बादे केनोपनिषदि विषयोऽयं चर्च्चितः दृश्यते । तद्यथा-

“प्रतिबोधविदितं मतममृतत्वं हि विन्दते,

आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम् । ”९

अत्र तावत् ‘विद्यया’ इति पदेन आध्यात्मिकत्वं सूचितम् । ‘आत्मना’ इति परमात्मनः कृते प्रयुज्यते । नित्यः ज्ञानस्वरूपः शाश्वतः आत्मा हनयमाने शरीरेऽपि कदाचित् न हन्यते । कठोपनिषदि यमराजेन नचिकेतसे परमात्मनः स्वरूपमुपदिष्टम् । हृदयरूपे आत्मनि प्रच्छन्नरूपेण आत्मा विद्यते । ‘अनादिनिधनो धाता विधाता धातुरुत्तमः’ इत्युक्तिः परमात्मनः यथार्थ स्वरूपं निर्द्दिशति । अयं विभुरूपः सर्वव्यापी । सूक्ष्मतः सूक्ष्मातिरिक्तः महतो महीयान्न् आत्मा निष्कामकर्मयोगिना चिन्तारहितेन साधकेन च ज्ञातुं शक्यते । एतदुक्तमुपनिषदि –

“अणोरणीयान्महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम्,

तमक्रतुः पश्यति वीतशोको धातुप्रसादान्महिमानमात्मनः ”१०

---

पादटीका :

७.मुंडको°३/२/४ ८.कठोप°१/३/१५ ९.केनोप°२/४ १०.कठोप°१/२/२०

अत्रापि ‘धातुप्रसादात्’ इत्युक्त्या परमात्मनः कृपा इति बोध्यते । अनयैव जगतः स्थितिः सम्भवति । जीवात्मनि परमात्मा निहितों विद्यते इति हेतोः स्थूलत्वेन ज्ञातुं शक्यं न केनचित् । सर्वगुणातीतः विशुद्धः अप्रमेयाम् अप्रतिमप्रभावां शक्तिं प्रशंस्य श्वेताश्वतरोपनिषद्यप्युक्तम्-

“न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कृतोऽयमग्निः ,

तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति । ”११

वस्तुतः यः सर्वप्रकाशकः तं प्रकाशयितुं को वा समर्थः इत्येतद्भावः । संसारस्य उत्पत्ति-विनाशप्रकारकं ज्ञानम् आध्यात्मि-

कत्वमिति धिया सर्वेषां कृते एतदावश्यकम् । सर्वेषु प्राणीषु दुर्लभेऽस्मिन् मानवजन्मनि केवलं परमात्मनः गूढ़रहस्यमवगन्तुं शक्यते । उक्तिर्विद्यते यथा –‘सा विद्या या विमुक्तये । ’

अत्र तावत् विद्या नाम मोक्षमूला पारमात्मिकी । अनया संसारस्य रहस्यं ज्ञायते । जीवनस्य महत्त्वमपिनिर्द्धारयितुं शक्यते । अस्मिन् वस्तुवादजगति आध्यात्मिकता अपरिहार्या । संकल्पानुसारं जीवः योनिं प्राप्नोति इति । अतः सङ्कल्पः उन्नतः स्यात् । अनित्येऽस्मिन् जीवने सर्वदा भगवतः चिन्तनं कुर्वन् सत्कर्मणि आत्मानं योजयेत् । अन्यथा जन्म-मृत्युबन्धनात् मुक्तिरसम्भवैव । तदर्थमुच्यते –

"उत्पत्तिमायतिं स्थानं बिभुत्वं चैव पञ्चधा ,आध्यात्मं चैव प्राणस्य विज्ञयामृतमश्नुते विज्ञयामृतमश्नुत इति ।। " १२

कर्मबंधनेऽस्मिन् संसारे सततं मानवः त्रिविधं दुःखमनुभूय काम-क्रोधादिभिः पीड़ितः सन् स्वाभाविकतया मोक्षमिच्छति । किं तर्हि मोक्षज्ञानम् ? किं वा मोक्षस्योपायः इत्याकारकाः प्रश्नाः समागच्छन्ति मनसि । एतादृशानां विविधानां प्रश्नानां समाधानरूपेण रहस्यविद्यामयी उपनिषद् अस्मभ्यमुपदिशति । इयमध्यात्मवादस्य मार्गदर्शिका । ब्रह्मज्ञः पुरुषः परमात्मनः उपासको वा आत्मानं दुःखात् मोचयति संसारबंधनात् प्रमुच्य जन्म-मृत्युचक्रात् आत्मानमुद्धरति । अतः उच्यते-

"पुरमेकादशद्वारमजस्यावक्रचेतसः , अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते । "१३

परमात्मनः उपासकः ब्रह्मलोके प्रविश्य अमृतत्वं लभते । वेदान्तविद्यां सम्यक् अधीत्य कर्मफलासक्तिं परित्यज्य योगेन अन्तःकरणं विशुद्धयति । अन्तःकाले परमात्माप्राप्तिः भवति । एतद्धि प्रमाणितं मुण्डकोपनिषदि –

"वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगात् यतयः शुद्धसत्त्वाः ।

ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे ॥"१४

---

पादटीका :

११.श्वेताश्व°६/१४ १२.प्रश्नोप°३/१२ १३.कठोप° २/२/१ १४.मुण्डको°३/२/६

उपनिषत्सु सांख्यसिद्धान्ताः

सांख्यदर्शने अज्ञानस्वरूपं ज्ञानस्वरूपं दुःखस्वरूपं मोक्षस्वरूपं प्रभृतयः विषयाः आलोचिताः वर्तन्ते । क्रमेण एतेषाम् आलोचनमग्रे कुर्मः । प्रथमं तावत् अज्ञानस्वरूपप्रसङ्गः आलोचयाम ।

**सांख्यदर्शने अज्ञानं नाम ज्ञानाभाव: ज्ञानविरोधी भावांतरमात्रम् । ज्ञानं नाम सत्त्वधर्म: यत्र तमोधर्म: अज्ञानमेव । तमोवृद्धौ अज्ञानं मलिनत्वं वा संजायते । उच्यते –**

**"अज्ञानं तामसं चित्तवृत्तिरूपं पुरुषेण सः स्वप्रकाशार्थं संवद्धं पुरुषमेव मोहयति । नानाविषयेषु पुरुषं प्रवर्तयन् नानाविधै: दु:खैराकुलं तनोति ॥" १५**

**यथार्थरूपेण अज्ञानस्वरूपे इदं वक्तुं शक्यते यत् तमोगुणाधिक्ये कामक्रोधादिषु विकारेषु अज्ञानस्याविर्भावः । उपनिषदि अज्ञानात् मुक्त्यर्थं ब्रह्मज्ञानमेव परमगतिः इति विवृण्वन् कथ्यते अज्ञानं तमोमयम् । तत्र उच्यते –**

**"अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।**

**ततो भूय इव ते तमो य उ विद्यायां रताः ॥"१६**

**अत्रोपनिषदि कामक्रोधादिविकारयुक्तं कर्म अविद्यानाम्ना अभिहितम् । एतादृशं कर्म न मोक्षाय अपितु अज्ञानतमोमयसंसारे दुःखसंतप्ताय ।**

**अधुना अज्ञानात् परं ज्ञानस्वरूपमालोचयाम: । सांख्यदर्शने ज्ञानं, नित्यरूपं दुःखरहितमिति प्रतिपाद्यते । उपनिषदि ज्ञानं विद्यारूपा अनिर्वचनीयं ; पारमात्मिकं नित्यं वेति निरूपितं वर्तते । अतो निगद्यते—**

**"अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ।"१७**

**ज्ञानरूपा विद्या मोक्षमूला । ज्ञानं नित्यं चैतन्यं सनातनम् अमृतरूपमेव । साङ्ख्यदर्शने मोक्षस्य स्वरूपम् उक्तं वर्तते । तत्र**

**आध्यात्मिक-आधिभौतिक-आधिदैविकानां त्रिविध-दुःखानां विनाशार्थं मोक्षार्थं वा उपायः विहितः । साङ्ख्यशास्त्रे उच्यते –"पुरुषे हि अज्ञानेन दुःखं कल्पितमासीन्न तु वास्तविकमिति । "**

**एतत् तथ्यम् उपनिषत्सु अपि परिलक्षते । ज्ञानं विना जीवः संसारबन्धनात् विमुक्तः भवितुं नार्हति । मोक्षस्य स्वरूपत्वेन समाधीयते साङ्ख्ये-'पुरुष-वृत्तित्वेन दुःखस्य बाधितम् ।'**

**उपनिषदि पुरुषः परमात्मा एव । जीवः सर्वेषां प्राकृतिककार्याणां छन्द-यज्ञ-शुभकर्म-सदाचार प्रभृतीनांवेदविहितानां कर्मणाम्म् अधिष्ठातुःपरमेश्वरस्य ज्ञानानन्तरं मायां त्यक्तुं शक्नोति । जीवस्य प्रवृत्ति: तदा विनष्टा स्यात् यदा सः परमात्मनि आत्मानं योजयेत् । अर्थात् त्रिविधदुःखस्य विनाशः सम्भवेदेव ।**

---

**पादटीका :**

**१५. भारतीय दर्शन एवं दिग्दर्शन (ओड़िया),पृ°१४७ १६.ईशोप°१/९ १७.ईशोप°१/११**

**उपनिषत्सु योगसिद्धांता:**

**सांख्यवादिभि: इव प्रकृतिस्त्रिगुणात्मिका नानाविधपरिणामशालिनी जगत्कारणत्वेन स्वीक्रियते योगिभि: । केवलं तस्या: स्वातन्त्र्यम् एते नाङ्गीकुर्वन्ति । तत्र योगदर्शने किं ज्ञेयमिति प्रश्नात् आह 'ईशाधिष्ठिता सविकारा प्रकृति:' इति । परमात्मा सर्वजगन्मंगलक: सर्वज्ञ: । तदिच्छामनुसृत्य सर्वं जगज्जायते । यथा अंत:करणद्वारा स्वाभिलषितं साधयति तथैव निर्मलशुद्धसत्त्वप्रकृत्या जगदीश्वर: सर्वं कार्यं करोतीति । तथा च परमेश्वरेण प्रकृतिद्वारा निर्मितमिदं जगदिति ज्ञेयम् । अस्मात् सिध्यति परमात्मन: जगत्कारणता ।**

**श्वेताश्वतरोपनिषदि 'क्षरम्' 'अक्षरम्' चेति पदद्वयेन परमात्मन: अपरा-प्रकृत्या विनाशशीलस्य जड़वर्गस्य पराप्रकृत्या: जीवसमुदायस्य च ग्रहणं भवति । परमात्मन: एतादृशेन प्रकृतिद्वयसंयुक्तेन जायमानस्य स्थूलरूपस्य सूक्ष्मरूपस्य च जगतः धारक: पोषकः च परमात्मा इति स्वीकृतम् । तत्रोक्तम्-**

**"संयुक्तमेतत् क्षरमक्षरञ्च व्यक्ताव्यक्तं भरते विश्वमीश: ।**

**अनीशश्चात्मा वध्यते भोक्तृभावाज्ज्ञात्वा देवमुच्यते सर्वपाशै: । "१८**

**योगदर्शने 'ज्ञाता कीदृश: ?' इति प्रश्नात् समाधत्ते – 'नित्यश्चिद्रूप: ईश्वरश्च' इति । यथा सांख्यैर्नित्य: स्वयं प्रकाश: पुरुष: स्वीकृत: तथैव योगीभिरपि स्वीक्रियते ।योगिनामयमाशय: न केवलमयं पुरुषश्चित्तवृत्तिरूपान् कामक्रोधादीनात्मन्येव मन्यमान: शोचति किन्तु सर्वसाक्षिणं व्यापकं दीनानुग्राहिणं परमात्मानमजानन् शोचति । स यदि चराचरपालकं परमेश्वरं जानीयात् तथा स्वीयानि साधूनि असाधूनि वा कर्माणि तस्मै समर्पयेत् तदा न स: कदापि शोकभाग्भवेत् । परमात्मा आदिगुरूरिति अत्र उपदिष्ट: । गुरूपदेशं विना किमपि न संभवति ।**

**शास्त्रनिषेधविषयत्वं दु:खत्वमिति योगदर्शने उक्तम् । तथा हि यत् खलु सुखं दुःखं वा न तत् केनापि जीवेन अज्ञानाकुलमतिना ज्ञातुं शक्यते । पश्वादीनां नास्ति सुखदुःखादिविज्ञानम् । यत् खलु इन्द्रियाणां तृप्तिकरं तत् सुखमिति मत्वा तदाचरणे तेषां प्रवृत्ति : । यच्च एतद्विरुद्धं तत् दुःखं मन्यमानाः निवर्तन्ते । परं तु विपरीतमनुभवं लभन्ते । अस्मात् शास्त्रनिषेधविषयत्वमधर्मजन्यदुःखं धर्मजन्यं सुखमिति सिद्धान्तौ जायेते ।**

**तत्र योगाचार्यैः उक्तं "योगश्चित्तवृत्तिनिरोधः" इति । एतन्मतं सर्वथा मुमुक्षूणां तमः क्षयार्थं निर्द्दिष्टम् । योगीनां मतेन प्रकृतिपुरुषविवेकग्रहरूपमेव तत्त्वज्ञानम् । ईश्वरे चित्तसंयोगार्थं**

**विविधास्वपनिषत्सु अपि उपायाः कल्पिताः । तत्र जावालदर्शनोपनिषदः उदाहरणानि दातुं शक्यते । तद्यथा –**

**“स्वस्तिक गोमुखं पद्मं वीरसिंहासने तथा**

**...................युक्तः प्राणायामं सदा कुरु । ”१९**

---

**पादटीका :**

**१८.श्वेताश्वतरो°१/८ १९.जावालदर्शनोप°३/१-१३**

**उपनिषत्सु अद्वैतसिद्धांताः -**

**अद्वैतवादिनः मायामयं जगदिति वदन्ति । अन्तःकरणावच्छिन्नं चैतन्यं ज्ञाता इति अद्वैततत्त्वम् । “त्रिगुणात्मकमावरणविक्षेपशक्तिविशिष्टमतस्मिंस्तद्वुद्धिश्च इत्यज्ञातस्वरूपं दुःखस्वरूपञ्च वाधना लक्षणम् ।” सच्चिदानंदः अहम् इति ज्ञानम् । ईशोपनिषदि मुण्डकोपनिषदि श्वेताश्वतरोपनिषदि जावालोपनिषदि पैङ्गलोपनिषदि प्रभृतिषु अनेकासु उपनिषत्सु अस्य तत्त्वस्य विचारः मूलभूतरूपेण वर्तते । पैङ्गलोपनिषदि “तत्त्वमसि,त्वं तदसि, ब्रह्मस्याहं ब्रह्मास्मीत्यनुसन्धानं कुर्यात् ।”२० मैत्रेय्युपनिषदि परमात्मनः नित्यत्वं विभुत्वम् एकत्वञ्च प्रतिपादितं विद्यते । तथैव आत्मोपनिषदि अपि एतादृशं वर्णनं दृश्यते । तद्यथा-**

**“आत्मसंज्ञः शिवः शुद्धः एक एवाद्वयः सदा । ब्रह्मरूपतया ब्रह्म केवलं प्रतिभासते ।।**

**जगद्रूपतयाप्येतद् ब्रह्मैव प्रतिभासते । विद्याऽविद्याभेदेन भावाऽभावादि भेदते ।।**

**गुरुशिष्यादि भेदेन ब्रह्मैव व प्रतिभासते । ब्रह्मैव केवलं शुद्धं विद्यते तत्त्वदर्शने ।।**

**न च विद्या न चाविद्या न जगच्च न चापरम् । सत्यत्वेन जगद्भानं संसारस्य प्रवर्तकम् ।।**

**असत्यत्वेन भानं तु संसारस्य निवर्तकम् । घटोऽयमिति विज्ञातुं नियमः को न्वपेक्षते ।।**

**विना प्रमाणसुष्ठुत्वं यस्मिन्सति पदार्थधीः । अयमात्मा नित्यसिद्धः प्रमाणे सति भासते ॥” २१**

**एतावता महता प्रयत्नेन सूक्ष्मधिया आत्मस्वरूपं नित्यनैमित्तिकोपासना मोक्षमूलविद्यादयः बहवः विषयाः सैद्धान्तिकतया उपन्यस्ताः । उपनिषदः एव वैष्णव-शैव-शाक्तसिद्धान्तानां समाकारिकाः । वस्तुतः आत्मज्ञानं पारमात्मिकीं भावनां च बिहाय न काऽपि गतिः मानवस्य । अतो निगद्यते-**

**"एको हंसो भुवनस्यास्य मध्ये स एवाग्निः सलिले संनिविष्टः ।**

**तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥"२२**

**उपनिषदां साररूपेण श्रीमद्भगवद्गीता अपि अधुनातनसमाजाय प्रधानत्वं भजते । इयमेव भगवतः साक्षात् मुखनिःश्रुता अमृतमयी धारा वा । उच्यते-**

**सर्वोपनिषदो गावो दोग्धा गोपालानन्दनः । पार्थो वत्सा सुधीर्भोक्ता दुग्धं गीतामृतं महत् ।"(गीतामाहात्म्ये)**

**श्रीमद्भगवद्गीताध्ययनेन उपनिषत्सु प्रवेशः सुकरः जायते । अस्मिन्नेव ग्रन्थे अष्टादशयोगरूपेण अर्जुनविषादयोगादारभ्य मोक्षसन्न्यासयोगं यावत् अष्टादशाध्यायाः वर्तन्ते । ग्रन्थोऽयं न केवलं संप्रदायमेकस्य अपि तु विश्वजनानां कृते आह्वानम् । अत्र सामान्यतया कैश्चिच्छब्दैः उपनिषद्सिद्धान्ताः आकलिताः ।**

---

**पादटीका :**

**२०.पैङ्गलोपनिषद्°३/२**

**उपसंहारः**

**अधुनातन समाजे भोगप्रवणानां वस्तुवादिनां कृते मानवोचिताः गुणाः नितरामपरिहार्या । स्वकर्त्तव्यं विहाय मानवाः विपथगामिनः भवन्ति । स्वाध्यायात्प्रमदन्ति । अतःउपनिषत्सु विद्यमानानि तत्त्वानि अवश्यमध्येतव्यानि । श्रीमद्भगवद्गीतायाः अध्ययनमध्यापनं विना उपनिषदां महत्तत्त्वमवगंतुमशक्यं सर्वथा साधारणमानवाय इति शोधकर्त्तुः आशयः । मानवजीवनदर्शनस्य साक्षात् प्रतिफलनमेव अयं ग्रन्थः । तत्र सफलजीवननिर्वाहार्थं अनेकानि तत्त्वानि उपवर्णितानि भगवन्मुखेन । अतः संस्कृतवाङ्मये निहितानां मानवतत्त्वमूलां मोक्षमूलाञ्चोपनिषदाम् आलोचनमपरिहार्यम् ।**

**ॐ सहनाववतु**

**सह नौ भुनक्तु**

**सहवीर्यं करवावहै**

**तेजस्विनावधीतमस्तु**

**मा विद्विषावहै ॥**

ॐ शान्तिः, शान्तिः, शान्तिः ।

## संदर्भसूची


1.**Upanishads Wikipedia**

**2.Patrick Olivelle (2014), The Early Upanishads, Oxford University Press, ISBN 978-0195124354, pages 12-14**

**3.प्रश्नोपनिषद्°अनुवादक –रायबहादुर बावू जालिम सिंह ,नबकिशोर प्रेस,लखनऊ(Available e-book)**

**4.उपनिषद्वाक्यमहाकोशः,एस् . एस्. गजानन संपाले,संपूर्णानन्द संस्कृतविद्यालय,वाराणसी ,२००५**

**5.ईशदिनवोपनिषदः , पं.हरिरघुनाथ भागवत , संपूर्णानन्द संस्कृतविद्यालय,वाराणसी ,२००१**

**6.कठोपनिषद्, सुरेन्द्रदेव शास्त्री, संपूर्णानन्द संस्कृतविद्यालय,वाराणसी ,२००५**

**7.ईशादि नौ उपनिषद्, हरिकृष्णदास गोयन्दका , गीताप्रेस् , गोरखपुर ,२००६**

**8.ईशावास्योपनिषद्, आचार्य शिवप्रसाद द्विवेदी , संपूर्णानन्द संस्कृतविद्यालय,वाराणसी , २०००**

**9.प्रश्नोपनिषद् , हरिकृष्णदास गोयन्दका , गीताप्रेस् , गोरखपुर ,२००६**

**10.Mundaka Upanishad with Shankara’s Commentary(online)**

**11.श्वेताश्वतरोपनिषद् , गीताप्रेस् , गोरखपुर(online pdfbooks.ourhindi.com)**

12.JABALA UPANISHAD in English by R.A. Sastri(online)

13.द्वादशदर्शन सोपानावलि,पंडितरत्न श्रीपादशास्त्री हसूरकर,नागपब्लिशर्स,दिल्ली,२०००

14.ब्रह्मविद्या उपनिषद् सह अष्टाविंश उपनिषद् , भाष्यकार-श्री रामशर्मा आचार्य ,अनुवादक-श्री मधुसूदन महान्ति, धर्मग्रन्थ स्टोर , २००८

15.श्रीमद्भगवद्गीता, पं. रामदेव पाण्डेय: , चौखम्बा,वाराणसी , २००२

16.आत्मोपनिषद् (online-kosha.sanskrit.today)